श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

॥ मुम्मणिक्कोवै ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ मुम्मणिक्कोवै ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सत्यं रूपं निधाय स्वकमिह करुणादायिषु स्वाश्रितेषु
ज्ञानं दातुं स्थित ! श्रीदिविषदधिपते ! सद्गुणस्ते कृपाख्यः
एकं स्त्रीरूपमन्यादृशमिव गतवानज्ञतोच्छित्तये नः
भूत्वान्तर्दीप्तदीपोमरिधर इव ते विग्रहे दिव्यभव्ये॥ **1.1** ॥

आविर्भूय त्वया या सह वृतवच आकर्ण्य भूयस्तदेव
प्रश्राव्योन्मूलने ये स्वदुरितनिचयस्योद्यता स्वाङ्घ्रिरक्ताः।
त्वामेवाप्ता यथा स्युर्भगवदनुगुणास्त्वत्सनाथा तदर्थं
दीव्यन्ती सुस्थिता सा भवति भगवती त्वत्प्रिया पद्मसद्मा॥ **1.2** ॥

श्रीलोलस्स्वपदाश्रितेषु सततं सत्यानपेतोक्तिमान्
ऋज्व्या रक्तरुचा च शोभितमहावक्षस्स्थले हि श्रिया।
रम्यै रत्नवरैर्युतामिह महामालामिवेमां स्वकां
मालामप्युररीकरोति सुवचस्त्रैविध्यकृप्तां मुदा॥ **2** ॥

यत्रोदीरयतां व्रजन्ति समतां त्रय्युक्तिभिश्चोक्तयः
तत्राहीन्द्रपुरेऽवतीर्य भगवान् “आत्मानुभूत्युत्सुकाः।
आस्तेऽत्रानुभवन्त्वि” ति ह्यमृतवाराशेर्दयालोकिनः
तस्यर्तस्य मृदूपदा वभिलषन्त्याः कोमलाङ्ग्याः तनौ॥ **3.1** ॥

अनङ्ग स्त्वात्मरम्येक्षुचापनिस्सृतमार्गणान्।
पुष्पवर्षैर्निर्विशेषां प्रवर्षति मुदा सदा॥ **3.2**॥

वर्षोत्था इव बुद्बुदाः प्रविलयं याताश्च लोका अमी
यो नैवेषदपि प्रयाति विकृतिं सत्याकृतिर्भेजुषाम्।
दुर्ज्ञेयागमवेदनीयविषये सश्रीक एवेष्यते
तादृग्वैभवदेवनायक भवानेकोऽस्ति तत्तादृशः॥ **4.1**॥

श्रीस्त्वं ते श्रिय एव चन्द्र इव सज्योत्स्नः स्वभावान्वितः
सद्दीपस्त्वविनाश्यभा निरवधिः पीयूषपाथोनिधिः।
क्षीराब्धिर्विविधैर्यया मणिवरैरापूरितो भ्राजते
त्वं कल्याणगुणावलिप्रविलसच्छीलप्रभावान् सदा॥ **4.2**॥

भक्तानां दुरितानि नेयुरपि ते स्वान्तं यथा तान्यहो
सर्वाण्यप्यनुशास्य रक्षसि तथा त्वं चैव तादृक् प्रभुः।
त्वं सन्नप्यसमस्समं च कृतवान् त्वां सक्तमस्मादृशैः
स्थित्वाहीन्द्रमहापुरे करुणया संदृश्यसे नः कृते॥ **4.3**॥

चारुश्यामलरत्नवत्प्रविलसन्नित्याग्र्यमूर्तौ हि ते
अस्त्रालङ्करणाख्यतस्त्वमखिलं तत्वं बिभर्ष्यन्वहम्।
वैकुण्ठे परवासुदेवतनुतो धत्से चतूरूपतां
नामद्वादशनैकरूपमहितो व्याप्तोऽसि देहं च मे॥ **4.4**॥

मत्स्यः कूर्मो वराहो नरहरिरमराधिष्ठितेस्सम्प्रमाता
मायावी वामनोऽसौ परशुधरमुनिस्तौ द्विधाभूतरामौ।
उर्वीभारापनेता यदुकुलतिलको द्वारकाधीशकृष्णः
कल्की कल्युग्रपापप्रशमननिपुणस्सर्वसन्त्राणदक्षः॥ **4.5**॥

स्थातुं सौलभ्यतोऽत्राप्यतिबलदुरितोन्मूलनार्थं सदा त्वं
नानारूपाणि गृह्णन् स्वचरणशरणास्साधुचर्या महान्तः।
वैकुण्ठे दिव्यधामन्यतिशयमहिमा शोभिते सर्वभोग्यं
तं चानन्दं महान्तं त्वनुभवितुमिवेहावतीर्य स्थितोऽसि॥ **4.6**॥

विश्वात्मैकान्तरात्मा ह्यनितरसदृशस्त्वं सदा श्री समेतः
अन्तर्यान्तात्मवर्गं सुरुचिरमखिलं धारयन् मोदसे त्वम्।
सर्वत्रान्यैरवद्यो घृतमिव पयसि व्यापृतस्सन् समस्तं
कुर्वाणोऽत्युत्तमं त्वं समधिकमहिमा व्याप्यचाश्चर्यभूम्ना॥ **4.7**॥

संरक्ष्यत्वेन चास्मान् जगति परिगृहीतुं समर्थंविनात्वं
पश्यामो नैव चान्यां वयमिह सुगतिं प्रोक्तनानाप्रकारैः।
सर्वं विद्योतयन्तं प्रतनतमपथात्यन्तशुद्धाः प्रसिद्धाः
धैर्येणाग्रप्रवृत्ता निगमफणितयश्चैव सन्दर्शयन्ति॥ **4.8**॥

तात्पर्यं परिशुद्धवेदनिहितं निस्संशयं निश्चितं
वेदान्तप्रविवोधनातिशयतस्संप्राप्य पूर्णा वयम्।
अम्भोजासनवेदपाठसमये वेद्याय वन्द्याय हि
श्रीनारायणनाम्न एव नियता दासा अभूम ध्रुवम्॥ **5**॥

वर्षन्तं यस्य कस्याप्यहिपतिपुरमास्थाय कारुण्यवर्षं
नीलं तं प्रेक्ष्य मेघं वनरुचिरमयूर्युत्कटप्रेमभावा।
जाताश्रुस्स्विन्नगात्री पुलकिततनुरुत्कम्पमानात्तलज्जा
किं चास्ते निश्वसन्ती किमिदमिति वयं पश्यतां वा वदाम॥ **6**॥

मत्याः प्रदानात् प्रतिभान्विताया:
मतिर्नवोन्मेषवती त्वमेव।
त्वत्तो हि सर्वाणि चकासते ततः
त्वमेव तेजोवसतिः प्रभाकरः॥ **7.1**॥

छायाप्रदानाहितसंप्रमोदात्
माता त्वमेवापि समेत्य पूर्वम्।
संरक्षितत्वाच्च पिता त्वमेव
त्वमेव जात्वप्यविसृष्टबन्धुः॥ **7.2**॥

अशाश्वतात्यल्पसुचेतरत्वात्
त्वमेव नित्यः पुरषार्थभूतः।
फलानपेक्षाकरणादुपायः
त्वमेव सर्वार्थपुमर्थ रूपः॥ **7.3**॥

अधर्ममार्गप्रविमोचकत्वात्
त्वमेव धर्मः परमोऽसमश्च।
त्वमेव चान्यादृशरूपवत्वात्
त्वमेव लक्ष्मीवसतेर्विशुद्धः॥ **7.4**॥

नारायणेति व्यपदिष्टनाम्नः
त्वमेव वेदोदितसर्वकारम्।
अनन्यलभ्योत्तमधामदानात्
त्वमेव सर्वप्रदकल्पवृक्षः॥ **7.5**॥

अन्यूनभावात् किल सर्वथापि
त्वमेव सर्वाधिपतीश्वरश्च।
दुःखापनेदैकसमर्थ भावात्
त्वमेव चानन्दमहागुणाकृतिः॥ **7.6**॥

मय्यन्तरात्मभिधया निवासात्
त्वमेव चाहं पदवाच्य आत्मा।
न किञ्चिदस्तीति विनात्वदीयं
त्वमेव सर्वंवसु मामकीनम्॥ **7.7**॥

कस्याप्यभावादसतश्च कर्मणः
"सत्" शब्दवाच्यः सुमहान् त्वमेव।
अन्तर्निवेशात् जगतामथैषां
त्वं सर्वशक्तश्च बहिर्निवेशात्॥ **7.8**॥

सत्य ! त्वदीया भवतीह यादृशी
माया तयैवोपभितास्ति नान्या।
तादृक्प्रभावानुभव प्रवृत्ताः
आम्नायवाचः खलु निर्विशङ्काः॥ **7.9**॥

आम्नायेषु गवेषयत्स्वहिपुरीमेत्यावतीर्य स्थितः
पाथोनिध्युपमो निदानमखिलस्यापीह नारायणः।
ऊर्ध्वं पादमुदक्षिपच्च तमिमं प्राक्षालयत् विश्वसृट्
तत्तीर्थग्रहणैकपात्रमभवन्नूनं सुवर्णाचलः॥ **8**॥

अद्रावौषधमोषधे रहिपुरे क्रूराघनिर्मूलन
श्रुत्वाश्चर्यमिहोषितं तदमितप्रेमेप्सुयोषिन्मणेः।
पद्माया विविधानुभूतिनिवहान् सन्दर्शयन्त्याश्च नः
चापभ्रूव्रततेस्सुदुस्त्यजपरोत्कण्ठाऽऽविरासातुला॥ **9**॥

समाह्वयति वारणे सपदि कारणोपागतः
त्वमेव हि ससर्जिथ त्वदितराणि सर्वाण्यपि।
उपायफललिप्सवस्समुपयन्ति च त्वां परं
प्रयन्त्यमितसम्मदं भवत एव न त्वन्यतः॥ **10.1**॥

त्वदर्थमिह ते कृतिः ममकृते कथं वापि न
त्वदीयवपुषा जगत्समभवत्तटिच्चञ्चलम्।
भवत्पदसमाश्रिताः खलु भवत्समानाश्च ते।
त्वयि त्वकृतभक्तयो जगति ते च नोज्जीविताः॥ **10.2**॥

श्रीमते निगमान्तमहादेशिकाय नमः

वेदान्तार्यः कवीन्द्रो गुरुमणिरिह यां "मुम्मणिक्कोवै" नाम्नीं।
चक्रे मालां प्रकृष्टां त्रिभिरिव मणिभिः द्राविडीं सूक्तिमालाम्।
श्रीमत्त्रय्यन्तरामानुजगुरुकरुणापात्रगोपालसूरिः
कर्णाटोक्या विवव्रे त्रिदशभणितिभिश्श्लोकयामास मोदात्॥

॥ इति मुम्मणिक्कोवै सङ्ग्रहः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥